महामहिम-आचार्य-
श्रीमदमृतवाग्भव जी महाराज
(वि० सं० १९६०—२०३९)
चित्र वि०सं० २०१७ का

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

॥ श्रीः ॥

श्रीगुरुवरस्तवः

यः सर्वशास्त्रसुरहस्यविदां वरिष्ठः
श्रीपाणिनीयगहने सुकृताधिकारः ।
कौमार एव निगमागममर्मवेत्ता
तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥१॥
सिद्धाय योगिपतयेऽमृतवाग्भवाय

सर्वेषु तन्त्रगहनेषु स्वतन्त्रकाय ।
आचार्यकाय महिताय महामहिम्ने
नित्यं नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥

वैदर्भब्राह्मणकुले विदुषां वरिष्ठे
वाराणसीचिरनिवासविवृद्धपुण्ये ।
जातः समुद्रगहनादिव चन्द्रमा य-
स्तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥२॥
सिद्धाय योगिपतयेऽमृतवाग्भवाय०

सम्प्राप्य जन्म महिते सुपुरे प्रयागे
विद्यां मुदैव समुपार्ज्य शिवस्य पुर्याम् ।
विद्वत्सु तत्र समवाप हि यः प्रतिष्ठां
तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥३॥
सिद्धाय योगिपतये०

बाल्ये पितुः समुपलभ्य रहस्यभूतां
विद्यां श्रियः सततवद्धरिवस्यया यः ।
आजीवनं ह्यनुबभूव कृपां जनन्या-
स्तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥४॥
सिद्धाय योगिपतये०

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

दुर्वाससो मुनिवरस्य मुखारविन्दाद्
आप्त्वा परां य इह शाम्भवयोगदीक्षाम् ।
अभ्यस्य तत् फलमवाप महद्विचित्रं
तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥५॥
सिद्धाय योगिपतये०

यो यौवनेऽपि विचचार विरक्तभावाद्
योग्याञ्जनाननुपदिशन्निह योगमार्गम् ।
शिष्याश्च यस्य बहवो विचरन्ति देशे
तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥६॥
सिद्धाय योगिपतये०

शास्त्राणि यो रचितवान् विविधानि विद्वान्
धर्मार्थमोक्षफलदानि जनोपकृत्यै ।
व्याख्यातवांश्च कतिचित् स्वयमेव देव-
स्तस्मै नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥७॥
सिद्धाय योगिपतये०

हे नाथ सिद्धगतिमाप्य न विस्मरास्मान्
कष्टानि नः क्षपय सौख्यशतानि देहि ।
सत्प्रेरणां कुरु च नो हृदये निविष्ट-
स्तुभ्यं नमोऽस्तु गुरवेऽमृतवाग्भवाय ॥८॥
सिद्धाय योगिपतयेऽमृतवाग्भवाय
सर्वेषु तन्त्रगहनेषु स्वतन्त्रकाय ।
आचार्यकाय महिताय महामहिम्ने
नित्यं नमोऽस्तु भवतेऽमृतवाग्भवाय ॥

इति श्रीबलजिन्नाथपण्डितविरचितः
श्रीगुरुवरस्तवः ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri

महामहिम-आचार्य-श्रीमद्-अमृतवाग्भव जी
के प्रकाशित ग्रन्थः—

संख्या	ग्रन्थ	टीका आदि	मूल्य
१)	महानुभवशक्तिस्तोत्रम्	(संस्कृत-हिन्दी व्याख्या)	१—०
२)	श्रीपरशुरामस्तोत्रम्	(हिन्दी अनुवाद)	अमूल्य
३)	श्रीविंशतिकाशास्त्रम्	(संस्कृत-हिन्दी व्याख्याएं)	५—७५
४)	सप्तपदीहृदयम्	(संस्कृत व्याख्या, हिन्दी-अंग्रेजी अनुवाद)	१—५०
५)	सञ्जीवनीदर्शनम्	(हिन्दी अनुवाद)	१—५०
६)	सङ्क्रान्तिपञ्चदशी	(हिन्दी गद्य-पद्य अनुवाद)	१—०
७)	परशिवप्रार्थना (सिद्धमहामन्त्र)	(हिन्दी अंग्रेजी अनुवाद)	अमूल्य
८)	मन्दाक्रान्तास्तोत्रम्	(हिन्दी अनुवाद)	३—०
९)	,, ,,	(हिन्दी व्याख्या)	५—०
१०)	श्रीआत्मविलासः	(सुन्दरी नामक हिन्दी व्याख्या आदि)	२०—०
११)	श्रीसिद्धमहारहस्यम्	(मूल मात्रम्)	१—५०
१२)	श्रीमदमृतसूक्तिपञ्चाशिका	(संस्कृत व्याख्या)	३—०
१३)	श्रीराष्ट्रालोकः	(हिन्दी अनुवाद)	१—५०

अन्य प्रकाशित ग्रन्थ :—

१)	श्रीपञ्चस्तवी	(ज्ञानदीपिका सहित)	१—५०
२)	श्रीललितासाहस्रं काव्यम्	(हिन्दी अनुवाद)	अमूल्यम्

श्रीपीठम्,

सैद्धदर्शनशोधसंस्थानम्, जम्मू ।

CC-0. Sri Radha Krishna Samsthan, Delhi. Digitized by eGangotri